नं० ८२१-घ

क १ पत्र ख २ पत्र ग १

मुकुन्दमाला व्रजविहारः गङ्गास्तवम्

च २ पत्र छ १ १ १ १

नीतिप्रदीपः नव पंच षट् सप्त ८

ङ

रत्नानि पद्यसंग्रहः २

के) शृंगारतिलकम् २ पत्र

१३ पत्र

नं० ८२१-घ

पत्राणि १३ (अपूर्णम्)

(प्रथम संख्यातः १४ संख्यां यावत् पत्राण्यनुपलब्धानि)

२०/५/७२

१ २ २ १ १ १ १ २ २३

पत्र १५ से लेकर २० तक नं. ८२१

मपरं न जातु जाने हरिचरणस्मरणामृतेन तुल्यं ॥ ९ ॥ मा भैर्मन्दमनो विचिंत्य बहुधा यामी
श्चिरं यातना नैवामी प्रभवंति पापरिपवः स्वामी ननु श्रीधरः । आलस्यं व्यपनीय भक्ति
सुलभं ध्यायस्व नारायणं लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ।१०। भवजल
धिगतानां द्वंद्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानां । विषमविषयतोये म
ज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणां ॥११॥ रजसि निपतितानां मोहजा
लावृतानां जननमरणदोलादुर्गसंसर्गगानां । शरणमशरणानामेक एवातुराणां कुशल
पथनियुक्तश्चक्रपाणिर्नराणां ।१२। अपराधसहस्रसंकुलं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु १३ मा मे स्त्रीत्वं मा च मे स्यात् कुभावो
मा मूर्खत्वं मा कुदेशेषु जन्म । मिथ्यादृष्टिर्मा च मे स्यात्कदाचित् जातो जातो विष्णुभक्तो
भवेयं भवामि १४ कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वानुसृतिस्वभावात् करोमि यद्यत्सक
लं परस्मै नारायणायेति समर्पयामि । १५। यत्कृतं यत्करिष्यामि तत् सर्वं न मया कृतं । त्वया

मुकुं॰ त्वयाकृतंतत्फलभुक् त्वमेवमधुसूदन ॥१६॥ भवजलधिमगाधं दुस्तरं निस्तरेयं कथ
मा॰ महमिति चेतो मास्म गाः कातरत्वं। सरसिजदृशिदेवे तारकीभक्तिरेका नरकभिदि
१५ निषण्णा तारयिष्यत्यवश्यं ॥१७॥ तृष्णातोयेमदनपवनोद्धूतमोहोर्मिमाले दारावर्ते
15 तनयसहजग्राहसंघाकुलेच। संसाराख्येमहतिजलधौ मज्जतांनस्त्रिधामन् पादाम्भो
जे वरद भवतोभक्तिभावंप्रसीद ।१८। पृथ्वीरेणुरणुःपयांसिकणिकाःफल्गुः
स्फुलिङ्गोलघुस्तेजोनिःश्वसनंमरुत्तनुतरंरंध्रंसुसूक्ष्मंनभः। क्षुद्रा रुद्रपितामह
प्रभृतयःकीटाःसमस्ताःसुरा दृष्टे यत्रसतारकोविजयते श्रीपादधूलीकणः १९
आम्नायाभ्यसनान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं मेदश्छेदपदानिपूर्तविधयः
सर्वंहुतंभस्मनि। तीर्थानामवगाहनानिचगजस्नानंविनायत्पदद्वन्द्वाम्भोरु
हसंस्मृतिंविजयते देवःसनारायणः ॥२०॥ आनंदगोविंदमुकुंदराम नाराय
णानंतनिरामयेति। वक्तुंसमर्थोपिनवक्तिकश्चिद् अहोजनानांव्यसनानिमोक्षे २१ १५

क्षीरसागरतरंगशीकरासारतारकितचारुमूर्त्तये। भोगिभोगशयनीयशायिने माध
वाय मधुविद्विषे नमः ॥२२॥ इति श्रीकुलशेखरेण राज्ञा विरचिता मुकुंदमाला सं॰

॥ व्रजविहारः ॥ गायंतीनां गोपसीमंतिनीनां स्फीता
कांता मत्तरोलम्बमालां। निश्वासोष्मम्लानमास्यारविंदे कुर्वन्नव्याद्देवकीनंदनो वः ॥१॥
स्वपर्णीस्वर्नाद्यैरुचितमणिशृङ्गाजलधिजा मुखाम्भोजे भृङ्गो निगमविलसत्पञ्जरशुकः।
त्रिलोकीकस्तूरीतिलककमनीयो व्रजवधूविहारी श्रीकृष्णो दिशतु भवतां शर्म सततं ।२।
कस्त्वं बाल बलानुजस्त्वमिह किं मन्मंदिराशंकया युक्तं तन्नवनीतकुंभविवरे हस्तं कथं
न्यस्यसि। कर्त्तुं तत्र पिपीलिकापनयनं सुप्ताः किमुद्बोधिताः बालावत्सगतिं विवेक्तुमि
ति संजल्पन् हरिः पातु वः ॥३॥ जीर्णा तरिः सरिदतीव गभीरनीरा बाला वयं सकलमि
त्थमनर्थहेतुः। निस्तारबीजमिदमेव कृशोदरीणां यन्माधव त्वमसि सम्प्रति कर्णधारः ४।
श्रीश्रीकृष्णो जयति जगतां जन्मदाता च पाता हर्त्ता चान्ते हरति भजतां यश्च संसारभीतिं।

व्रज विहारः १६
16

राधानाथः सजलजलदः श्यामलः पीतवासा वृंदारण्ये विहरति सदा सच्चिदानंद
रूपः ॥५॥ ज्योतीरूपं परमपुरुषं निर्गुणं नित्यमेकं नित्यानंदं निखिलजगतामीश्वरं
वीश्ववीजं गोलोकेशं द्विभुजमुरलीधारिणं राधिकेशं वंदे वृंदारकहरिहरब्रह्मवंद्यांघ्रि
पद्मं ॥६॥ येषां श्रीमद्यशोदासुतपदकमले नास्ति भक्तिर्नराणां । येषामाभीरकन्या
प्रियगुणकथने नानुरक्ता रसज्ञा ॥ येषां श्रीकृष्णलीलाललितगुणकथा सादरौ नैव क
र्णौ । धिक् तान् धिक् तान् धिगेतान् कथयति नितरां कीर्तनस्थो मृदंगः ॥७॥ केचि
द्वदंति धनहीनजनो जघन्यः केचिद्वदंति गुणहीनजनो जघन्यः व्यासो वदत्यखिल
हीनजनो जघन्य वेदविशेषविज्ञो नारायणस्मरणहीनजनो जघन्यः ॥८॥ वृंदावने वृंदलताप्रतानैः
वृंदावने शस्यविहारहेतोः । पुराविधात्रा रचितान् सकुंजान् जगाम कृष्णः सह राधया सः ॥९॥
नवीनमेघोपमनीलदेहः सुपीतपट्टाम्बरयुग्मधारी । स्मिताननः कुंडलवान् किरीटी
वंशीधरो मालितमाल्यधारी ॥१०॥ नवीननीलाम्बुदकांतिमद्वपुः सस्मेरवक्त्राम्बुजवेणु

१६

यादवः। अनेकरत्नाभरणैर्विभूषितः सत्सुंदराङ्गो महसा महोज्ज्वलः ॥११॥ गोपीजनानंद
करो मुरारिः वृंदावनेंद्रो वनमाल्यशोभी। वंशीनिनादेन व्रजाङ्गनानां मनांसि सम्मो
हितवान्स को मी ॥१२॥ नाशाय बालकगणान्सह कंसराजः तां पूतनामसुरराक्षसीं च।
संप्रेषयामास यदा तदा तां मायाशिशुः प्राणसमं प्रशोष ॥१३॥ जिघांसया समायांतीं पू
तनां राक्षसीं वरां। क्रोडे कृत्वा स्तन्यदात्रीं जघान बालको हरिः ॥१४॥ गोपीगणो यमिह
कामदृशा भजन्ते ये भक्तिभाज इह केवलभक्तिभावैः यं योगिनो हृदि धिया परिचिंतयंति
तं केवलं कमललोचनमाश्रयेहं ॥१५॥ कृष्णैककारणपरेण शशधरवदने पीतकौशेयवस्त्र
रत्नालङ्कारभूषे जलजलधरश्यामले सुंदराङ्गे। वंशीवाद्यप्रमोदे व्रजजनयुवतीजीवने
यादवेंद्रे भूयाद्भक्तिर्दृढा मे सकलसुखवहैः सेव्यमाने मुरारौ ॥१६॥ वृंदारण्ये विहरति सदा
वासुदेवो दयालुः गोपस्त्रीभिः स्मरशरशतैर्भिन्नहृत्कामुकीभिः। गोपैर्बालैरपि सहचरैः
सार्द्धमानंदयुक्तैः योऽसौ कृष्णः परमकरुणस्तं सदा चिंतयेहं ॥१७॥ वृंदावनस्थानविहारहेतो

व्रजवि
हारः
१७
17

राधासमं कुंजगृहप्रवेशं। चकार गोपीजनवल्लभोसौ पायादपायादपि मां मुरारिः। १८।
वने वने कुञ्जवने मुरारिर् भ्रमन् भ्रमन् भ्राजति राधिका च। सहैव कुञ्जे रमते च राधया
पायादपायादिह कृष्णरूपकः। १९। अनंत विश्वंभर वासुदेव समस्तदेवैरपि वंद्यपाद।
निरामय त्राणपते मुरारे हरेहराशेषमहाघसंघं २०। इति श्रीधरस्वामिना विरचितं
॥ गुणरत्नं ॥ ॥ ॥ व्रजहारकाव्यं समाप्तं ॥ः॥ ॥ ॥
सानंदं नंदिहस्ताहतमुरजरवाहूतकौमारवर्हि त्रासान्नासाग्ररंध्रं
विशति फणिपतौ भोगसंकोचभाजि। गंडोड्डीनालिमालामुखरितककुभस्तांडवे
शूलपाणेर् वैनायक्याश्चिरं वो वदनविधुतयः पांतु चित्कारवत्यः ॥१॥ यत्कंठे गरलं
विराजति सदा मौलौ च मंदाकिनी यस्यांगे गिरिजाननं कटितटे शार्दूलचर्मांबरं।
यन्मायाहि हराद्धि विश्वमखिलं पायात्स वः शंकरः जम्बूवत् जलबिंदुवत् जल
जवत् जम्बालवज्जालवत् ।२। विद्यानाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं विद्या भो

गकरी यशःसुखकरी विद्यागुरूणां गुरुः। विद्या बंधुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥३॥ गुणो गुणं वेत्ति न वेत्ति निर्गुणो बली ब
लं वेत्ति न वेत्ति निर्बलः। पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषिकः ॥४॥
गुणा गुणज्ञेषु गुणा भवंति ते निर्गुणं प्राप्य भवंति दोषाः सुस्वादुतोयाः प्रभवंति नद्यः समु
द्रमासाद्य भवंत्यपेयाः ५ गुणायंते दोषाः सुजनवदने दुर्जनमुखे गुणा दोषायंते किमिति
जगतां विस्मयपदं। यथा जीमूतोयं लवणजलधेर्वारि मधुरं फणी पीत्वा क्षीरं वमति गरलं
दुःसहतरं ॥६॥ विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय। खलस्य साधोर्विपरी
तमेतत् ज्ञानाय दानाय च रक्षणाय ॥७॥ मतिरेव बलात् गरीयसी तदभावे करिणामियं दशा।
इति घोषयतीव डिंडिमः करिणो हस्तिपकाहतः क्वणन् ॥८॥ वरं गर्भस्रावो वरमपि च
नैवाभिगमनं वरं जातप्रेतो वरमपि च कन्याभिजननं। वरं वंध्या भार्या वरमपि च गर्भेषु वस
तिः न चाविद्वान् रूपद्रविणगुणयुक्तोपि तनयः ॥९॥ यथा काशशिशोभना गतघना सा

गुण रत्न॰ १८ 18

यामिनी यामिनी यासौन्दर्यगुणान्विता पतिरता साकामिनी कामिनी। यागोविंदरसप्रमो
दमधुरा सामाधुरी माधुरी यालोकद्वयसाधनीतनुभृतां साचातुरी चातुरी ९ ज्ञातिभि
र्वंट्यते नैव चौरेणापि न नीयते। दाने नैव क्षयंयाति विद्यारत्नं महाधनं १० अजरामर
वत्प्राज्ञो विद्यामर्थंञ्चचिन्तयेत्। गृहीतइवकेशेषु मृत्युनाधर्ममाचरेत् ११ गुणेन
स्पृहनीयःस्यात् नरूपेणायतोजनः। सौगंध्यवर्ज्यनादेयं पुष्पंकांतमपि क्वचित् १२।
इति श्रीमहाकविभवभूतिविरचितं गुणरत्नकाव्यं समाप्तं ॥३३॥

नीतिप्रदीपः॥ रत्नाकरः किंकुरुते स्वरत्नैर्
विंध्याचलः किंकरिभिः करोति। श्रीखंडखंडैर्मलयाचलः किं परोपकाराय सतां
विभूतिः १ कर्णाविघातैरपिताड्यमाना दूरीकृताः करिवरेण मदान्धबुद्ध्या। तस्यैव
गंडयुगमंडनहानिरेषा भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥२॥ येनाकारि मृणाल
पत्रमशनं क्रीडा करिण्या सह स्वच्छंदं भ्रमणाच्चकंदरगणे पीतं पयो निर्झरं। सोयं

वन्यकरी नरेषुपतितः पुष्णातिदेहंत्वरोर् यद्दैवेनललाटपत्रलिखितं तत्प्रो
ज्झितुंकःक्षमः ॥३॥ शशिदिवाकरयोर्ग्रह पीडनं गजभुजंगमयोरपि बंधनं ।
मतिमतांच्च विलोक्य दरिद्रतां विधिरहोबलवान् इतिमेमतिः ।४। व्योमैकांतविहा
रिणोपि विहगाः संप्राप्नुवंत्यापदं बध्यन्ते निपुणैरगाधसलिलान् मत्स्याःसमुद्रा
दपि । दुर्नीतंहि विधौ किमस्तिचरितं कःस्थानलाभेगुणः कालोहि व्यसनप्रसा
रितकरो गृह्णाति दूरादपि ॥५॥ अपिदलन् मुकुले बकुलेयया पदमधायि कदा
पि न तृष्णया । अहह सा सहसा विधुरे विधौ मधुकरी बदरीमनुवर्तते ॥६॥ गतो
स्मितीरं जलधेः पिपासया सचापि शुष्कस्त्वकीकृतो मया । नदृश्यते दोषलवो
पितोयधेर् ममैवतत्कर्मफलंविजृम्भते ॥७॥ सिंहस्तुंगमकरीन्द्रकुंभगलितं रक्ताक्तमु
क्ताफलं तोलोरवदरीधियाद्रुतमगात् भिल्लस्यपत्नीमुदा । पाणौप्राप्यगुरुत्वमुक्तकठिनं
तदीत्पहस्येजहा वस्यात्रपतनतामतीवमहतामेतादृशीस्याद्गतिः ।८। किंत्वेनमत्वतया

नीति प्रदी॰ १९ 19

किमुन्नततया किंतेघनच्छायया किंतेपल्लवलीलया किमनया चाशोकपुष्पश्रिया।
यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोमः स्तुवन्नन्वयं न स्वादूनि मृदूनि खादति फलान्यु
त्कंठमुत्कंपितं ।९। दूरे मार्गान्निवससि पुनः कंटकैरावृतोसि छायाशून्यः फल
मपि च ते वानरैरेव भक्ष्यं। निर्गंधस्त्वं मधुपरहितः शाल्मले सारशून्यः सेवास्माकं
भवति विफला तिष्ठ निर्व्यस्ययामः १० हंसाः पद्मवनाशया मधुलिहः सौरभ्य
लाभाशया पांथाः स्वादुफलाशया बलिभुजो गृध्राश्च मांसाशया। दूरादुन्नतपुष्प
रागनिकरैः निःसारमिथ्यान्वितैः रेरे शाल्मलिपादप प्रतिदिनं केनत्वमावंचितः ११
किंतेन हेमगिरिणा रजताद्रिणा वा यत्राश्रिता हि तरवस्तरवस्त एव। वन्दामहे म
लयमेव यदाश्रयेण शाकोटनिम्बकुटजान्यपि चंदनानि १२ निर्वाणदीपे किमु
तैलदानं चौरे गते वा किमु सावधानं। वयोगते किं वनिताविलासः पयोगते किं
खलु सेतुबंधः १३ शीते तीते वसनमशनं वासरान्ते निशांते क्रीडारम्भः कुवलय

१९

दृशां यौवनांते विवाहः स्नेतोर्बंधः पयसि गलिते प्रस्थिते लग्नचिंता सर्वङ्गेन ङ्गवति
विफलं स्वस्वकालिव्यतीते ।१४। नवंवस्त्रं नवच्छत्रं नव्यास्त्री नूतनं गृहं सर्वत्र नूतनं
शास्तं सेवकान्नेपुरातने ।१५ समायाति यदा लक्ष्मीर् नारिकेलफलाम्बुवत् विनि
र्याति यदा लक्ष्मीर् गजभुक्तकपित्थवत् ।१६ इति श्री महाकवि वेताल भट्ट
विरचितं नीतिप्रदीपकाव्यं समाप्तं ॥ ३ ॥

पद्यसंग्रहः ॥

नत्वा तां परमेश्वरीं गौरीं शिवकरीं श्रीभारतीं भास्वतीं गंगातीरनिवा
सिना सकविना लोकोपकारार्थिना । नानापंडितवक्त्रनिर्गतवतां निर्मीयते केन
चित् पद्यानामिह संग्रहो मतकथाप्रस्ताव विस्तारिणां ॥ १ ॥ काठ्ठं भव्यात भपि विज्ञनि
वहैराखाद्यमाने मुहुर् दोषान्वेषणमेव मन्त्ररपुषां नैसर्गिको दुर्ग्रहः कासारेपि वि
काशि पंकजचये खेलं नराले पुनः क्रौञ्चस्य स्फुटेन कुञ्चितवपुः सम्बूकमन्वेषते । २ ।
अतिरमणीये काव्येः पिशुनो दूषणामन्वेषयति । अतिरमणीये वपुषि व्रणामिव

१०

पद्य
संग्रहः
२१

मल्लिकानिकरः ॥३॥ कीर्त्तिः स्वर्गतरंगिणीभिरभितो वैकुंठमाप्लावितं क्षौणीनाथ
तवप्रतापतपनैः संतापितः क्षीरधिः । इत्येवं दयितायुगेन हरिणा त्वं याचितः स्वा
श्रयं हृत्पद्मं हृदये श्रियेस्वभवने कंठं गिरे दत्तवान् ४ । रेवः कविः किंसमरस्य
सारं कृषिर्भयं किं किमटनिभृङ्गाः । सदाभयं ब्रह्मपदं त्वकेषां भागीरथीतीर
समाश्रितानां ॥५॥ वासः काञ्चनपिञ्जरे नृपकराम्भोजैस्तनूमार्जनं भक्ष्यं स्वा
दुरसालदाडिमफलं पेयं सुधाभं पयः । पाठः संसदि रामनाम सततं धीरस्य
कीरस्य मे हाहा हन्त तथापि जन्मविटपिक्रोडं मनो धावति ६ । उदयति यदि भानुः
पश्चिमे दिग्विभागे विकसति यदि पद्मः पर्वतानां शिखाग्रे । प्रचलति यदि मेरुः
शीततां याति वह्निर् न चलति खलु वाक्यं सज्जनानां कदाचित् ।७। निर्वाणदी
पे किमु तैलदानं चौरे गते वा किमु सावधानं । वयोगते किं वनिताविलासः
पयोगते किं खलु सेतुबन्धः ।८। वरमसिधारा तरुतलवासो वरमिह भिक्षा

वरमुपवासः। वरमपि घोरे नरके पतनं नच धनगर्वितबांधवशरणं ॥९॥ कुग्रा
मवासः कुजनस्य सेवा कुभोजनं क्रोधमुखी च भार्या। मूर्खश्च पुत्रो विधवा च कन्या
बिनाग्निना संदहते शरीरं ॥१०॥ वरं मौनं कार्यं नच वचनमुक्तं यदनृतं वरं क्लैब्यं पुं
सां नच परकलत्राभिगमनं। वरं भिक्षाशित्वं नच परधनास्वादनसुखं वरं प्राण
त्यागो नच पिशुनवादेष्वभिरतिः ॥११॥ निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्रा
धिपः लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेश्वरत्वं पुनः। चक्रेशः पुनरिन्द्रतां सु
रपतिर्ब्राह्म्यं पदं वांछति ब्रह्मा विष्णुपदं हरिः शिवपदं त्वाशावधिं के गताः ॥१२॥
ख्यातः शक्रो भगाङ्को विधुरपि मलिनो माधवो गोपजातो वेश्यापुत्रो वसिष्ठः
सततजपरयमः सर्वभक्ष्यो हुताशः। व्यासो मत्स्योदरीयः सलवणउदधिः पाण्डवा
जारजाता रुद्रः प्रेतास्थिधारी त्रिभुवनवसतां कस्य दोषो न जातः ॥१३॥ तुरगशत
सहस्रं गोगजानां च लक्षं कनकरजतपात्रं मेदिनी सागरान्तां। विमलकुलवधूनां

पद्यसंग्रहः २१

कोटिकन्याश्च दद्यात् नहि नहि सममेतेरत्नदानं प्रधानं ॥१४॥ कालिदास
कविता नवं वयः माहिषं दधि सशर्करं पयः। येन मां सम वलाच कोमला
संभवंतु मम जन्म जन्मनि १५। नात्तराणिपठता किमपाठि पाठितोपि
किमवि स्मृतपव श्रुत्य मर्थिजनसंशयदोला खेलना खलु चकार नकारः ॥१६।
लक्ष्मण सेन उवाच ॥ शैत्य नाम गुणास्तवैव त्वदनु स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवंत्य शुचयः स्पर्शेन यस्याः परे। किंचातः परमं नव स्तुतिपदं
त्वं जीवनं देहिनां त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां निरोद्धुं क्षमः १७ ॥
वल्लाल उवाच ॥ तापो नापगतस्तृषा न च कृशा धौता न धूली तनोर्
न स्वच्छंद मकारि कंदकवलः कानाम केलीकथा। दूरोत्क्षिप्तकरेण हंत करिणा स्पृष्टा
नवा पद्मिनी प्रारब्धो मधुपैरकारणमहो झंकारकोलाहलः १८ तेनावउवाच।
परीवादस्तथ्यो भवति वितथो वापि महतां अतथ्यस्तथ्यो वा हरति महिमानं

जनरवः । त्वल्लोकनीर्णस्यापि प्रकटितहन्ताशेषतमसो रवेस्तादृक्तेजो नहि भवति कस्मां

गतवतः ॥१९॥ राजोवाच । सुधांशोर्जातेयं कथमपि कलङ्कस्य कणिका विधातृ

र्दोषोयं नच गुणनिधेस्तस्य किमपि । सकिं नात्रेः पुत्रो नकिमुहरचूडार्चनमणिर्

नवाहंति ध्वान्तं जगदुपरि किंवा नवसति ॥२०॥ इति श्रीकविभट्टकृतःपद्यसंग्रहः

समाप्तः ॥३३॥

नवरत्नानि

धन्वंतरि क्षपणकामरसिंह शंकु वेतालभट्ट घटकर्पर

कालिदासाः । ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ।

नवरत्नं ।

मित्रमर्थी तथा नीतिर्धर्मिकार्पण्य मूर्खकाः स्त्रीणांतिद्धभक्तथा स्वानानवरत्न

मिदं क्रमात् ॥ मित्रं स्वच्छतया रिपुं नयबलै र्लुब्धं धनै रीश्वरं कार्येण द्विजमा

दरेण युवतीं प्रेम्णा समैर्बांधवान् । अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुध

नव
रत्नं
२२

विद्याभीरसिकं रसेन सकलं शीलेन कुर्य्याद्वशं १ अर्थी लाघवमुक्तितो निपतनं
कामातुरो लाञ्छनं लुब्धोऽकीर्त्तिमसंगरः परिभवं दुष्टोऽन्यदोषे रतिं । निःस्वोऽवंच
नमुन्मना विकलतां शोकाकुलः संशयं दुर्वागप्रियतां दुरोदरवशः प्राप्नोति क
ष्टंमुहुः २ नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरंगनानां धृतिर्दंपत्योः शिशवो गृह
स्य कविता बुद्धेः प्रसादो गिरां । लावण्यं वपुषः स्मृतिः सुमनसां शांतिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मंडनं ३ धर्म्मः प्रागेव चिंत्यः सचिव
मतिगतिर्भावनीया सदैव ज्ञेयं लोकानुवृत्तं वरचरनयनैर्मंडलं वीक्षणीयं । प्रच्छा
द्यौ रागरोषौ मृदुपरुषगुणौ योजनीयौ च काले आत्मा यत्नेन रक्ष्यो रणशिरसि
पुनः सोऽपि नापेक्षणीयः ४ कार्पण्येन यशः क्रुधा गुणचयो दंभेन सत्यं क्षुधा
मर्यादा व्यसनैर्धनानि विनयो दुःस्थ्येश्रया पौरुषं दारिद्र्येण जनादरो ममतया
चात्मप्रकाशो हतः ५ मूर्खोऽशांतस्तपस्वी क्षितिपतिरसलो मत्सरो धर्म्मशीलो

दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्महीनः । आज्ञाहीनो नरेन्द्रः शुचिरपि
सततं यः परान्नोपभोगी वृद्धो रोगी दरिद्रः सचयुवतिपतिर्धिग्विडम्बप्रकारं ।६।।
स्त्रीणां यौवनमर्थिनामनुगमो राज्ञां प्रतापः सतां सत्यं स्वल्पधनस्य संचितिरसद्वृ
त्तस्य वागाडंबरः । सचारस्य मनोदमः परिणतेर्विद्याकुलस्यैकता सेवाया धन
मन्त्रेतर्गुणोच्चयः शांतेर्विवेकोबलं ७ विद्वान्सं सदि पातिकः परवशो मानी
दरिद्रो गृही चिन्ताग्रस्तः कृपणः सुखी परवशो वृद्धोन तीर्थाश्रितः । राजा दुःसचि
वप्रियः कुलभवो मूर्खः पुमांस्त्रीजितो वेदांती हतसत्क्रियः किमपरं हास्यदं भूत
ले ।८। उत्खातान्प्रतिरोपयन् कुसुमितांश्छिन्दन् शिशून्वर्द्धयन् । तीव्रान्कंटकि
नो बहिर्नियमयन् ग्लानान् मुहुः सेवयन् मालाकार इव प्रयोगनिपुणो राजा
चिरं नंदतु ।९। इति नवरत्नं समाप्तं ।। ।। पंचरत्नं ।। नागः पोतस्तथा वैद्यस्तातिः
शाकं यथाक्रमं पंचरत्नमिदं प्रोक्तं विदुषामपि दुर्लभं ।।

पंच. नागो भाति मदेन कं जलरुहैः पूर्णेंदुना सर्वरी शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मंदिरं।
रत्नं. वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पंडितैः सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं वि
२२ ष्णुना १ पोता दुस्तरवारिराशितरणे दीपोऽंधकारागमे निर्वाते व्यजनं मदांधकरिणां
२३ दर्पोपशांत्यै सृणिः। इत्थं तन्नु भुवि नास्ति यस्य विधिना नोपायचिंता कृता। मन्ये दुर्जन
चित्तवृत्तिहरणे धाताऽपि भग्नोद्यमः २ वैद्यं पानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं
युद्धे कापुरुषं हयं गतरयं मूर्खं परिव्राजकं राजानं च कुमंत्रिभिः परिवृतं देशं च सोपद्रवं
भार्यां यौवनगर्वितां पररतां मुंचंति शीघ्रं बुधाः ३ क्षांतिश्चेत् कवचेन किं किमरिभिः क्रोधो
ऽस्ति चेद्देहिनां ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलं किं सर्पैर्यदि दुर्जनः कि
मु धनैर्विद्यानवद्या यदि व्रीडा चेत् किमु भूषणेन कविता यद्यस्ति राज्येन किं ४ शक्यो वार
यितुं जलेन हुतभुक् छत्रेण सूर्यातपः नागेंद्रो निशितांकुशेन चपलो दंडेन गोगर्दभौ।
व्याधिर्वैद्यकभेषजैरनुदिनं मंत्रप्रभावाद्विषं सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधं। ५।
इति पंचरत्नं समाप्तं।।

षट् रत्नं शास्त्रं कोर्थोन्वथा मूर्खो दानं दुर्मंत्रिणं तथा । लोभाच्चास्तीति विज्ञेयं क्रमात् षट्रत्नमीरितं । शास्त्रं सुचिंतितमथोपरिचिंतनीयं आराधितोपि नृपतिः परिशंकनीयः । अंके स्थितापि युवती परिरक्षणीया शास्त्रे नृपे च युवतौ च वशित्वं १ कोर्थान् प्राप्य न गर्वितो विषयिनः कस्यापदोनागताः स्त्रीभिः कस्य न खंडितं भुवि मनः को नाम राज्ञां प्रियः । कः कालस्य न गोचरांतरगतः कोर्थी गतो गौरवं को वा दुर्जनवाग्रसु प्रपतितः क्षेमेण यातः पुमान् २ मूर्खो द्विजातिः स्थविरो गृहस्थः कामी दरिद्रो धनवान् तपस्वी । वेश्या कुरूपा नृपतिः कदर्यः लोके षडेतानि विडम्बितानि ३ दानं दरिद्रस्य प्रभोश्च शांतिर्यूनां तपो ज्ञानवतां च मौनं इच्छानिवृत्तिश्च सुखोचितानां दया च भूतेषु दिवं नयंति ४ दुर्मंत्रिणं कमुपयांति न नीतिदोषाः संतापयंति कमपथ्यभुजं न रोगाः । कं श्रीर्न दर्पयति कं न निहंति मृत्युः कं स्त्रीकृता न विषया ननु तापयंति ५ लोभाच्चास्ति गुणेन किं पिशुनता यद्यस्ति किं पातकैः सौजन्यं यदि किं परैः स्वमहिमा यद्यस्ति किं मंडनैः सत्यं चेत्तपसा च

सप्त किं शुचिमनो यद्यस्ति तीर्थेन किं सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥६॥
रत्नः इति षष्ठरत्नं समाप्तं ॥ ॥सप्तरत्नम्॥ वांछा राजनयाच्छेदो हृत्तं वित्तेन किं
तया। स्वर्गो धनेन किं ज्ञेयं सप्तरत्नमिदं क्रमात् ॥ वांछा सज्जनसंगमे परगुणे
२४ प्रीतिर्गुरौ नम्रता विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादभयं। भक्तिश्चक्रिणि श
क्तिरात्मदमने संसर्गमुक्तिः खले येते यत्र वसंति निर्मलगुणास्तेभ्यो नरेभ्यो नमः १॥
राजा धर्मविना द्विजः शुचिविना ज्ञानं विना योगिनः कांता सत्यविना हयो गतिविना
भूषा च ज्योतिर्विना। योद्धा शूरविना तपो व्रतविना छंदो विना गीयते भ्राता स्नेहवि
ना नरो हरिविना मुंचंति शीघ्रं बुधाः ॥२॥ छेदश्चंदनचूतचम्पकवने रक्षालिसाको
टके हिंसा हंसमयूरकोकिलकुले काकेषु नित्यादरः मातंगेन खरक्रयः समतुला
कर्पूरकार्पासयोः एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः २ हूतं क्षीणफलं
त्यजंति विहगाः शुष्कं सरः सारसाः पुष्पं पर्युषितं त्यजंति मधुपा दग्धं वनांतं मृगाः।

निर्द्दैव्यं पुरुषं त्यजंति गणिका भ्रष्टश्रियं मंत्रिणः सर्वैकार्यवशाज्जनोभिरमते कस्या
स्तिको वल्लभः वित्तेन किं वितरेद्यदि नार्थिने दीने किं सेवया यदि परोपकृतौ न यत्नः।
किं संगमेन तनयो यदि नैव गुणीयः किं यौवनेन विरहो यदि वल्लभायाः।५। स्वर्गः किं
यदि तल्लभा निजवपुः किं वा विभूषाविधिः लावण्यं यदि किं सुधाकरकरैः शृंगाररागभा
गिरः। मृत्युः किं यदि दुर्जनेषु वसतिः किं धिक् यदि प्रार्थना प्राप्तिष्टः कविके तेना
यदि भवेत् किं कल्पवृक्षो महेः ६ धनेन किं यो न ददाति याचके बलेन किं यश्चरिपू
न्न बाधते। श्रुतेन किं यो न च धर्ममाचरेत् किमात्मना यो न जितेंद्रियो भवेत्॥७॥
इति सप्तरत्नं ॥ ॥ अष्टरत्नम्॥ अर्थोद्योम नया नित्यं त्वग्या
भोगो प्राप्तिन्यपि प्राप्तीतिः स्वस्त्र विज्ञेयमष्टरत्नमिदं क्रमात्॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च वश्यस्य पुत्रोऽर्थकरी च विद्या
षड्जीवलोकेषु सुखानि नाथ।८। व्योमैकांतविहारिणोपि विहगाः संप्राप्नुवंत्यापदं।

अष्ट॰ वध्यन्ते निपुणैरगाधसलिलात् मत्स्याः समुद्रादपि। दुर्नीते हि वियोकृतः सुचरितं
रत्न॰ कः स्यान्नलाभे गुणः कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि।२। नित्यं छेद
२५ स्तृणानां क्षितिनखलिखनं पादयोरल्पपूजा दंतानामल्पशौचं वसनमलिनता
25 रूक्षता मूर्द्धजानां द्वे संध्ये चापि निद्रा विवसनशयनं ग्रासहासातिरेकः स्वांगे पीठे
च वाद्यं हरति धनपतेः केशवस्यापि लक्ष्मीः।३। ब्रह्मा येन कुलालवन्नियमितो
ब्रह्माण्डभाण्डोदरे विष्णुर्येन दशावतारगहने न्यस्तो महासंकटे। रुद्रो येन कपाल
पाणिपुटने भिक्षाटनं कारितः सूर्यो भ्राम्यति नित्यमेव गगणे तस्मै नमः कर्म्मणे ४।
भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं माने दैन्यभयं बले रिपुभयं रूपे
तरुण्या भयं। शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं सर्वं वस्तु भया
न्वितं भुवि नृणां वैराग्यमेवाभयं ५ प्राणिनि खलकलंकः कंटकं पद्मनाले
युवतिकुचनिपातः पक्वता केशजाले। जलधिजलमपेयं पंडिते निर्धनत्वं वयसि

पनविवेको निर्विवेको विधाता ।६। शशीदिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपांगणगतः खलो मनसि सप्त शल्यानि मे ॥७॥ निःस्वो वष्टि शतं शती दशशतं
लक्षं सहस्राधिपो लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वांछति । चक्रेशः
पुनरिंद्रतां सुरपतिर्ब्राह्मपदं वांछति ब्रह्मा शैवपदं शिवो हरिपदं आशावधिं को
गतः ॥ इत्यष्टरत्नं समाप्तं ॥ शृंगारतिलकं ॥
बाहू द्वौ च मृणालमास्यकमलं लावण्यलीलाजलं श्रोणीतीर्थशिला च नेत्रसफरं
धम्मिल्लशैवालकं । कान्तायाः स्तनचक्रवाकयुगलं कंदर्पबाणानलैर्दग्धानामव
गाहनाय विधिना रम्यं सरो निर्मितं ॥१॥ आयाता मधुयामिनी यदि पुनर्नायात एव प्र
भुः प्राणा यान्तु विभावसौ यदि पुनर्जन्मग्रहं प्रार्थये व्याधः कोकिलवंधने विधुपरि
ध्वंसे चराहुग्रहः कंदर्पे हरनेत्रदीधितिरियं प्राणेश्वरे मन्मथः ॥२॥

श्रृंगा
रति॰
२६
26

इंदीवरेण नयनं मुखमम्बुजेन कुंदेन दंतमधुरं नवपल्लवेन अंगानि चम्पकदलैः
स विधाय धाता कांते कथं घटितवानुपलेन चेतः ॥ ३ ॥ एकोहि खंजनवरो नलिनी
दलस्थो दृष्टः करोति चतुरंगबलाधिपत्यं किं मे करिष्यति भवद्वदनारविंदे जानामि
नो नयनखंजनयुग्ममेतत् ॥ ४ ॥ ये ये खंजनमेकमेव कमले पश्यंति दैवात् क्वचि
त् ते सर्वे मनुजा भवंति सततं प्रख्यातभूमीभुजः त्वद्वक्त्राम्बुजनेत्रखंजनयुगं
पश्यंति ये ये जनास् ते ते मन्मथबाणजालविकला मुग्धे किमित्यद्भुतं ५ झटिति
प्रविश गेहं मा बहिस्तिष्ठ कांते ग्रहणसमयवेला वर्तते शीतरश्मेः । अयि सु
विमलकांतिं वीक्ष्य नूनं स राहुः ग्रसति तव मुखेंदुं पूर्णचंद्रं विहाय ॥ ६ ॥ कस्तू
रीवरपत्रभंगनिकरो भ्रष्टो न गंडस्थले नो लुप्तं सखि चंदनं स्तनतटे धौतं न नेत्रा
जनं रागो न स्खलितस्तवाधरपुटे तांबूलसंवर्द्धितः किं रुष्टासि गजेंद्रमंदगम
ने किं वा शिशुस्ते पतिः ७ समायाते कांते कथमपि च कालेन बहुना कथाभिर्देशानां

२६

सखिवरजनिरईगतवती। ततोयावल्लीलाकलहकुपितास्मिप्रियतमे सपत्नीवप्राची
दिगियमभवत्तावदरुणा ८ स्नातंनीरसकान्तताडनशतैः स्नातंप्रचण्डातपैः
क्लेशैः स्नातमनःस्वपंकनिचयैः स्नातंनिदाघानलैः। यत्कान्ताकुचपार्श्वबाहुलतिका
हिन्दोललीलासुखं लब्धंकुम्भवरत्वयानहिसुखंदुःखैर्विनालभ्यते ९ किंमेवक्त्रमुपे
त्यचुम्बसिवलात् निर्लज्जलज्जानुते वस्त्रांतं शठमुञ्चमुंचशपथैः किंधूर्तनिर्वन्धसे।
खिन्नाहंतवरात्रिजागरवशात् तामेवयाहिप्रियां निर्माल्योज्झितपुष्पदामनिकरे
काषट्पदानांरतिः १० वाणिज्येनगतःसमे गृहपतिर्वार्तापिनश्रूयते प्रातस्तज्जननी
प्रसूततनयाजामातृगेहंगता। बालाहंनवयौवनानिशिकथंस्थातव्यमस्मद्गृहे सायं
संप्रति वर्ततेपथिकहेस्थानांतरंगम्यतां ११ यामिन्येषाबहुलजलदैर्वद्धभीमांधकारा
निद्रांयातो मम पतिरसौ क्लेशितःकर्मदुःखी। बालाचाहं मनसिजभयात्प्राप्तगाढ
प्रकंपा ग्रामश्चौरैरयमुपहतःपान्थनिद्रांजहीहि १२ कभ्रान्तस्खलितोसिवेधकगृहे

शृंगार तिल॰ २७

किंतत्रशांतिस्तजा । किंतेनास्तिसखेविगृहेप्रियतमा सर्वंगदंहंतियाः ।१४। दृष्टिंदेहि
पुनर्बाले कमलायतलोचने । श्रूयतेहिपुरालोके विषस्य विषमौषधं १५ अंतर्ग
तामदनवह्निशिखावलीया नावाध्यतेकिमपिचंदनलेपनेन यत्कुंभकारपवनापरि
पक्वलेपस्तु तापायकेवलमसौनतुतापशान्त्यै ।१६। दृष्ट्वायास्तांनयनसुभगांवक्रु.वा
राङ्गनानां दर्शमागः परमकृतिभिः कुसुमशरैरकारि । तासामेव स्तनयुगजिता
दंतिनः संतिमत्ताः प्रायोमूर्खः परिभवविधौ नाभिमानंतनोति १७ अश्रुर्वा दृ
श्यतेवह्निः कामिन्यास्तनमंडले दृश्यतोदहनेगात्रंहृदिलग्नस्तुशीतलः १८ कुसुमे
कुसुमोत्पत्तिः श्रूयतेनचदृश्यते । बालेतवमुखांभोजे कथमिन्दीवरद्वयं १९ अयि
मन्मथचूतमञ्जरि प्रियेश्रवणायतलोचने । अपहृत्यमनःक्वयासिमे किमराज
कमत्रराजते २० कोपस्त्वयाहृदिकृतोमयिपंकजाक्षि सोऽस्तुप्रियंतवकिमत्रविधेयमन्
यत् । आश्लेषमर्पयमदर्पितपूर्वमुच्चैरुच्चैः समर्पयमदर्पितचुम्बनञ्च २१ इति कालि
दासकृतं शृंगारतिलकं समाप्तम् ॥ ॥

२